
# ||ಶ್ರೀಮದಾನನ್ದತೀರ್ಥಭಗವತ್ಪಾದಾಚಾರ್ಯಃ ||



Tracking:

| Sr | Date | Remarks | BY |
|---|---|---|---|
| 1 | | **Typing Started on** | **H K SRINIVASA RAO** |
| 2 | | **Typing Ended on** | **H K SRINIVASA RAO** |
| 3 | | **First Proof Reading** | **H K SRINIVASA RAO** |
| 4 | | | |
| 5 | | | |

# || ಶ್ರೀ ಹಯವದನ ರಂಗವಿಟ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ ||

*Blessed by Lord and with His divine grace, we are pleased to publish this Magnanimous Work of Sri Acharya Madhwa. It is a humble effort to make available this Great work to Sadhakas who are interested in the noble path of propagating Acharya Madhwa's Philosophy.*

*With great humility, we solicit the readers to bring to our notice any inadvertant typographical mistakes that could have crept in, despite great care. We would be pleased to incorporate such corrections in the next versions. Users can contact us, for editable version, to facilitate any value additions.*

*Contact: H K SRINIVASA RAO, N0 26, 2ND FLOOR, 15TH CROSS, NEAR VIDHYAPEETA CIRCLE, ASHOKANAGAR, BANGALORE 560050. PH NO. 26615951, 9901971176, 8095551774, Email :* **srkarc@gmail.com**

## ಕೃತಜ್ಞತೆಗಳು



ಜನ್ಮಾಂತರದ ಸುಕೃತದ ಫಲವಾಗಿ ಮಧ್ವಮತದಲ್ಲಿ ಜನಿಸಲು, ಪ್ರೇಮಮೂರ್ತಿಗಳಾಗಿ ನನ್ನ ಅಸ್ತಿತ್ವಕ್ಕೆ ಕಾರಣರಾದ, ಈ ಸಾಧನೆಗೆ ಅವಕಾಶಮಾಡಿದ, ನನ್ನ ಪೂಜ್ಯ ಮಾತಾ ಪಿತೃಗಳಾದ, ದಿವಂಗತರಾದ ಲಲಿತಮ್ಮ ಮತ್ತು ಕೃಷ್ಣರಾವ್ ಹೆಚ್ ಆರ್ ಅವರ ಸವಿ ನೆನಪಿನಲ್ಲಿ ಈ "ಸರ್ವಮೂಲ-ಜ್ಞಾನ ಯಜ್ಞ"

''ಮಾತೃದೇವೋ ಭವ – ಪಿತೃದೇವೋ ಭವ-ಆಚಾರ್ಯದೇವೋ ಭವ''

# अध्यात्म रसरंजनि

पाहि पाण्डवपालकामितपापिनं भवतापतो
एहि मानस मन्दिरागणदेशमीश नमोस्तु ते ।।
पुत्रमित्र कळत्र पूर्वमत्रगं न परत्रगं
यत्र यत्र गतिर्ममेश्वर तत्र तेऽस्ति पदाम्बुजम् ॥ 01 ।।

नो भयं न च दुर्गतिर्न च पातकं कलि कालजं
त्वय्यनाथगतौ सदैव हि मानसान्तिकसंस्थिते ॥
नित्यमेव विनोदमात्रमपेक्षितं सह मे त्वया
नैव किञ्चिदपेक्षितं प्रिय सत्यमेतदुदीरये ॥ 02 ।।

प्रीतिरस्ति तवापि संस्तुतिमात्र एव विनोदतोऽ
प्यावयोः समशीलयोरिह मन्दिरे न वियोगता ॥
देव ते पदपङ्कजे मम चित्तमेव न चेत्तदा
कुत्र गच्छति तद्वदस्व रमेश मेऽद्य सताङ्गणे ॥ 03 ।।

यद्यदो विषयेषु गच्छति तर्हि ते वचनं कथं
शोभते विषयेषु सन्तत भावनाद्यभिधायकं ॥
यज्जडं जडडतुल्यमन्यदतस्त्वमेव हि वस्तु नः
सौख्यदस्त्वमथाभिमुख्यकरस्त्वमेव न चेद्भवेत् ॥ 04 ।।

चित्तनामक यत्र यास्यसि तत्र गच्छति मे मनो
दुष्टता ननु कञ्चकस्य न शोभते वसुधातले ॥
एवमेव हि चक्षुराद्यखिलेन्द्रियस्य गतिर्भवेत्-

कायवृत्तिरपीत्थमेव विनिश्चिता बुध संसदि ॥ 05 ।।

कर्मकान्यपि हस्तपादतदङ्गुलीमुखदेहजा-
न्यत्र सन्ततवाक्समुद्भव वर्ण पूर्वक शब्दकाः ॥
सर्वदैव हि तावकामितमूर्तिकारणभावतो
दोषकारणभावमेव हि नैव यान्ति कुतश्चन ॥ 06 ।।

कामपूर्वकवृत्तयोपि हि ते सुखात्मकमूर्तिषु
व्यक्तिकारणभावतो न च दूषणाय भवन्ति मे ॥
नैव जानते ईदृशीं स्थितिमात्मनो ह्यखिलात्मनोऽ
साधु साधु च सर्वमेव हि तेषु दोषकरं भवेत् ॥ 07 ।।

पुण्यपापमपि त्वमेव हि देव गुह्यमिदं परं
त्वं त्वनादित एव पूर्वज पूर्वकारण मे प्रिय ॥
किं करोति हि किङ्करो यमराज कोपनियोजित-
स्तै विनैव वदन्ति निर्णयमत्र किं मुनयोऽपि भो ॥ 08 ।।

याः सहस्रशताधिका अपि कोटियश्च ततोऽधिका
वृत्तयो मम नित्यमेव च तासु ते बहुरूपिता ॥
क्षेत्रजोऽपि हि पुत्र एव ममेश्वरोसि तथाऽपि मां
नोद्धरिष्यसि पुत्रतैव सुशत्रुभावमथाप्नुयात् ॥ 09 ।।

भारते भुवि विप्रजन्म सुदुर्लभं यदि मन्यसे
साधनं कुरु देव पूर्वमहं तु तेऽनुकरोम्यलम् ॥
प्रत्यवायवचः कृतेपि च सर्वथा ह्यकृतौ निषे-
धोक्तिरप्यकृतस्य शास्त्रगतिज्ञवर्य कृतौ भवेत् ॥ 10 ।।

कर्तृता तव पूज्यताऽपि हि सर्वकर्मविनिश्चिताऽ
प्येतयोरथ चिन्तना कमलेश तेऽद्य विपश्चिता ॥
येन केन मिषेण सन्ततमादरेण मनोगतिः
श्रीहरेश्चरणाब्जयोरिदमेव साधनमीरितं ॥ 11 ॥

एतदेव च योग्यता प्रविभेदतो विविधात्मनां
संस्फुरत्यखिलस्य तत्तदवस्थया ह्यनुरूपया ॥
स्नानदानजपाग्निहोत्रसदिष्टिपूर्वतया तथा
पैत्रुकादिसमस्तकर्मतयापि काम्यतया पुनः ॥ 12 ॥

एवमेषहरीश्च देव मुनीष्टमातृमुखात्मनां
संस्फुरत्यखिलस्य तत्तदवस्थयाह्यनुरूपया ॥
यद्यदोह्युभयं च दैववशेन वेत्ति निजात्मना
तद्दिनः प्रभृतीह तस्य करस्थितैव हि मुक्तता ॥ 13 ॥

नाशिरः सख ते प्रकेसुललाटकं युगळं भ्रुवो
नाक्षिणीकपरस्य सत्स्वथ कर्णकेऽथ कपोलके ॥
सन्नृदेव सुनासिका सख वोत्तरोष्ठमथाधरं
सम्प्रदन्तसुपङ्क्युग्ममनन्त सन्तव जिह्विका ॥ 14 ॥

ते मुखं वसुकण्ठकूबर मत्र वोदितगो विभा-
वत्र दक्षिणकन्धरं परमत्र नाहसुकन्धरं ।
नाजदाककुदत्र नापसुपृष्ठमत्र सहस्तका
ऊर्ध्वदक्षिणबाहुरीदृशवामबाहुरपीदृशं ॥ 15 ॥

दक्षिणाधरबाहुरस्तु सहस्तकोऽप्यथ तादृशो
वामबाहुरुदाहृतः प्रचतुर्भीरिव कराङ्क भो।
पञ्चभिः करगाङ्गुलीनख देव ते हृदयं प्रमो-
रोऽस्तु ते स्तन युग्ममत्र नृजैत्र सूदर मत्र ते ॥ 16 ।।

प्राप्तनासख दक्षकुक्षिकमत्रवाविववापरं
नाभिरत्र समीश ते त्रिभिरुक्त संस्थवलित्रयः ।
बस्तिरत्र नृ वासुमेढ्रमथो गुदं वृषणं च वा
वाप्तनाकटिरत्र ते सख वाप्त वोरुयुगं हरे ॥ 17 ।।

जानुनी तव वासमत्र सदिष्टदानसमर्थजं-
घाभिधं परवात्र ते प्रपदाभिधं सख वास्तुते ।
पादयुग्ममिहापि सन्नखलक्ष्यतच्चतुरात्मना
पञ्चभिः पदगाङ्गुलीन खरोमचर्म च ना प्रभो ॥ 18 ।।

चक्षुषी तव चाक्षिसंस्थित एव देव रमापते
पाश्व चक्षुरथ क्रमेण च कर्णगं परमिन्द्रियम् ।
घ्राणकं रसनं च वा प्रसमत्र सन्त्वगपि प्रभो
वाक् च वा चतुरात्मकं करसंस्थपाण्यभिदेन्द्रियम् ॥ 19 ।।

पादपायसुमेढ्वगं तव सम्प्रनाश्च सुमानसं
बुद्धिरप्यथ ते प्रकोविद काम पूर्वकवृत्तयः ।
द्वित्रिपञ्चदशाधिकास्तव भावुकेष्टदमूर्तयः
शब्दपूर्वकपञ्चकं तव पञ्चरूपमथ प्रभो ॥ 20 ।।

स्नान भोजनपानपालनमेलनागमनार्चना

प्राणनोच्चलनाभिवादनमार्जनार्जनपूर्वकम् ।
सर्वकर्म सनामकं तव रूपमेव रमापते
शक्तयोऽप्यथ तत्र तत्र च ते स्वरूपकशक्तयः ॥ 21 ॥

मत्स्य एव किरीटिमम्बुजनाभ ते भव ईदृशः
कूर्म एव सुकर्ण कुण्डलमीदृशस्तव सूकरः ।
कण्ठभूषणमाश्रितं त्वदुदरश्च सिंहज सिंहको
भूषणस्तव बाहुसंस्थितमीदृशः सख वो हरे ॥ 22 ॥

आश्रितं कटिमत्र भूषणमीदृशस्तव भो हरे
पादयुग्मगतं विभूषण मत्र सम्भवरा प्रभो ।
संस्थितं च करेषु भूषणमीदृशं त्रजगत्पते
तादृशङ्गुलिभूषणं तव विष्णुकीर्तिसते हरे ॥ 23 ॥

एतदेव नवात्मकं नवरत्नरूपमनन्त तेऽ-
नन्त भूषणभूषणं निजलीलयैव सुतोषणम् ।
एकमूर्तितया च पञ्चतयाऽपि पञ्चदशात्मना
त्रिंशदादितया च मानसपूजने प्रतिभासते ॥ 24 ॥

द्रव्यकर्मगुणप्रभेदत आस्यास्यमिति क्रमा-
देतदेव च सर्वजीवगतं त्वनादित एव हि ।
प्रातरुत्थित एव सन्ततमातनोमि सुभाषितं
तद्विरुद्धमथापि तेऽस्तुनु बन्दिगीतमिति प्रभो ॥ 25 ॥

क्षालनं पदयोमुखस्य च पाणिपल्लवयोश्चगं-
डूषणं सततं तवास्त्विति मानसं रमतान्मुदा ।

चित्रभाषितमत्र किञ्चन चेद्भवेत्तदपि प्रभो
गीतवाद्यपुरस्सरं यदि तच्च तेऽस्तु महीपते ॥ 26 ।।

लालनं तनयादिकस्य च पालनं पितृपूर्वके
मेलनं ललनादिकेऽप्यनुकूलनं च तवास्तु भो ।
स्नानमस्त्वभिषेचनं तव तत्र पौरुषसूक्तकं
मन्त्रमस्त्वनु धौतवस्त्रकयुग्ममस्तु तवाम्बरम् ॥ 27 ।।

आसनाचमनं तवास्त्वनु चन्दनादिभिरङ्कनं
मालिकादिविभूषणं तव वन्दनं त्वथ सन्ध्ययोः ।
मन्त्रसंस्तवयन्त्रपूजनपूर्वकं परमेश ते
ध्यानमौनसुधारणादिकमस्तु ते पुरुषोत्तम ॥ 28 ।।

चन्दनादिभिरप्यलङ्कृतिरस्तु ते तिलकं च भो
देव भोजनपात्रमस्तु सुपानपात्रमथास्तु ते ।
नारिकेलफलादिमिश्रितमत्र वस्तु तवास्तु भो
व्यञ्जनं लवणं तथास्तु सुपत्रशाकमथापरम् ॥ 29 ।।

सूपमस्तु सुपायसं परदेव नैकविधं सदा
चित्रभक्षमनेकधाऽस्तु विचित्रमाषविनिर्मितम् ।
तैलपक्कमथास्तु ते घृतपक्कमस्तु हरे जला-
ङ्गारपक्कसुकालपक्कमथास्तु पक्क सुपञ्चकम् ॥ 30 ।।

चित्रमन्नमथास्तु तेऽद्य विचित्रवस्तु विनिर्मितं
चोदनं परमान्नमस्तु सदैव ते जगती पते ।
शर्करागुडमिश्रितान्नमथास्तु ते सततं हरि-

द्रान्नमस्तु तथैव भो प्रिय मौद्गमन्नमथास्तु ते ॥ 31 ।।

शस्तवस्तुविमिश्रितं पुनराम्लवस्तु सदाऽस्तु तेऽ-
नाम्लवस्तु तथास्तु ते परदिव्यवस्तुसमन्वितं ।
नूतनं नवनीतमस्तु रमेश नूतनमेव ते
प्रात्रपूर्णघृतं च तेऽस्त्वथ तक्रमस्तु दधीश ते ॥ 32 ।।

क्षारवस्तु रमापते मधुशर्कराऽपि सदाऽस्तु ते
लेह्यपेयसुचोष्यखाद्यमुखं परेश तवैव भो ।
पूर्वमुत्तरमम्भसोऽशनमस्तु तेऽथ परत्र भो
क्षालनं करयोर्मुखस्य च पादयोरथ नेत्रयोः ॥ 33 ।।

अङ्गुलीजलमस्तु सञ्चलनादिकं सफलं च तां-
बूलमस्तु सुदिव्यवस्तुविमिश्रितं वसुधापते ।
नूतनाम्बरमस्तु ते परिधानमस्तु तथैव चो-
ष्णीषकञ्चुकपादवस्त्रसुमध्यबन्धनमस्तुते ॥ 34 ।।

आविकं च तथूर्णपूर्वविचित्रवस्त्रमपीश ते
दर्पणं तव चामरे गणिकादिगीतसुनर्तनम् ।
छत्रवाद्यविचित्रशब्दसुलालनं स्वरभेदतः
पादरक्षकपूर्वमस्तु सदैव ते धरणीपते ॥ 35 ।।

वाजिपूरुषयानगोऽयुतमानमप्यथ ते तथो-
द्यानवीक्षणचारणादिकमस्तु ते कमलापते ।
क्षेत्रवीक्षणदेवतालयभित्तिचित्रनिरीक्षणं
पक्षियुद्धनीरीक्षणादि तवास्तु नित्यव चक्षण ॥ 36 ।।

तत्र तत्र फलादिभक्षणलक्षणेतरवीक्षणं
शिक्षणं निजभृत्यके गृहसङ्गमश्च पुनस्तव ।
क्षालनं पदयोस्तवास्त्वज पाणिपूजित पादगं-
डूषणं च तवास्तु चासनमस्तु ते भुजगासन ॥ 37 ॥

पात्रयुग्ममथास्तु सूदकपूर्णमस्तु तवैव कौ-
शेययुग्ममथाखिलं पर मान्हिकं च तथोत्तरम् ।
कन्दमूलसुकालपक्कफलं च सर्व मथास्तु ते
क्षीरनीरगुडेक्षुसर्पिरथास्तु ते व्यजनं च भो ॥ 38 ॥

यामजागरणं तवास्त्वनुगीतनर्तनपूर्वकं
मन्त्रपाठनसन्नमस्कृतिपूर्वकं च तवप्रिय ।
दीपयुग्ममथास्तु ते परधूपमस्तु सुगन्धयुक्
चाप उत्तमका भवन्तु नु तापहा मरुदस्तु ते ॥ 39 ॥

श्रीपते कशिपुस्तवास्त्वनु देव ते ह्युपबर्हणं
मञ्चपूर्वकभोगसाधनमस्तु सर्वमपीश ते ।
कङ्कणादिविभूषणं नववस्त्रमस्तु च किं पुनर्-
जागरस्थ समस्तवस्तु तवास्तुनिस्तुलवस्तु भो ॥ 40 ॥

यद्वदेव हि जागरस्थ समस्त वस्तु तव प्रभो
तद्वदेव च वासनात्मकवस्तु सर्वमथास्तु ते ।
सुप्तिगं सुखमस्तु ते पुनरस्तु मानसवासना
जातवस्तु समस्त मप्यथ जागरान्तमनन्त भो ॥ 41 ॥

व्याधयोऽप्यथवाधयस्तनुभेददाहनपूर्वकं
चात्र जन्मनि पूर्वजन्मसु चोत्तरेषु तथैव भो ।
किं पुनर्बहुभाषितेन शरीरजं त्वथ मानसं
वाग्जमस्तु तवेश सन्ततमेष सर्वविधिर्मम ॥ 42 ॥

बिम्बपूजनमेवमेव हि कुर्वतो न च पातकं
दुष्टकर्मजमप्यकर्मजमन्तिकं प्रति गच्छति ।
एतदत्र सुदुर्लभं भुवि भारते नरजन्मनां
क्वापि नैव सपातकात्मन अन्तिकं प्रतिगच्छति ॥ 43 ॥

बिम्बपूजनमन्तरा न च मुक्तिरस्ति हि कस्यचित्-
सर्वमन्यदनुष्ठितं ननु चित्तशोधनपूर्वकम् ।
साधनं भवतीह पूजन एव सन्ततमादरा
न्मोदतीर्थनिबन्ध एव हि मानमत्र मयोदिते ॥ 44 ॥

अवधूतशिरोरत्नजयतीर्थविनोदितः
प्रसन्नः श्रीहरिर्दद्यात् सतांसर्वमवेक्षितम् ॥ 45 ॥

भवरोगौषधं दिव्यं भजमानाः पुनः पुनः ।
बिम्बपूजनसंज्ञं ते न भजन्ति पुनर्भवम् ॥ 46 ॥

नन्दतीर्थप्रबन्धाख्यसुधासिन्धुविहारिणः ।
बान्धवा यत्कृतौ तोषं यान्त्येवान्तरचिन्तकाः ॥ 47 ॥

सुपुण्ये भारतेऽरण्ये ये विज्ञानविवर्जिताः ।
दुःशास्त्रदूषितात्मानः किं मां निन्दन्ति दुर्बलाः ॥ 48 ॥

दोषेताऽपि मदीया वाग्धार्यैव धरणीसुरैः ।
श्लाघ्यते गुणलब्धैर्हि कण्टकेताऽपि केतकी ॥ 49 ॥

|| इति श्रीमदवधूतशिरोमणिजयतीर्थार्य (विष्णुतीर्थ – अरण्यकाचार्य) विरचिताऽध्यात्मरसरञ्जनि समाप्ता ॥ श्रीकृष्णार्पणमस्तु